# Shivaproktam Kashimahimavarnanam

# શિવપ્રોક્તં કાશીમહિમાવર્ણનમ્

## Document Information

Text title : Shivaproktam Kashimahimavarnanam

File name : shivaproktaMkAshImahimAvarNanam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 2-35.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાશીમહિમાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

(શિવગૌરીસંવાદે)

શિવઃ ઉવાચ

પૃથિવ્યાં સન્તિ તીર્થાનિ કોટિશઃ કમલાનને ।
તાનિ સર્વાણિ તીર્થાનિ કાશીપ્રાપ્તિકરાણિ ચ ॥ ૨॥

શ્રીકાશીક્ષેત્રભિન્નાનિ સન્તિ તીર્થાનિ કોટિશઃ ।
તેષુ તપ્તે હિ તપસિ કાશી સમ્પ્રાપ્યતે શિવે ॥ ૩॥

યેન જન્મસ્વનન્તેષુ કૃતા ધર્માઃ સહસ્રધા ।
તેનૈવ લભ્યતે કાશી મદ્રૂપા મુક્તિદાયિની ॥ ૪॥

ન કાશ્યા અધિકં ક્ષેત્રં ન કુત્રાપિ વરાનને ।
સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૫॥

યદેતદ્વિમલં લિઙ્ગં દૃશ્યતેઽદ્ય મદાત્મકમ્ ।
એતલ્લિઙ્ગસમં લિઙ્ગં ન કુત્રાપિ વરાનને ॥ ૬॥

ઇદમેવ પરં જ્યોતિરિદમેવ પરાત્પરમ્ ।
ઇદમેવ મદાકારમનન્તમિદમેવ હિ ॥ ૭॥

અનન્તવેદવેદાન્તસારઃ સર્વો વરાનને ।
પિણ્ડીભૂયાત્ર સતતં લિઙ્ગાકારેણ તિષ્ઠતિ ॥ ૮॥

નિર્વિકારં પરં બ્રહ્મલિઙ્ગમેતન્મનોરમે ।
નિષ્કલં નિર્મલં શાન્તમિદમેવ ન સંશયઃ ॥ ૯॥

શૈવમેતન્મહસ્સાક્ષાદક્ષયં લિઙ્ગમુત્તમમ્ ।
ઇદં લિઙ્ગમનાદ્યન્તં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૧૦॥

સર્વપુણ્યફલાકારમવિકારં નિરઞ્જનમ્ ।

લિઙ્ગમેતન્મમોઙ્કારં મુક્તિપ્રદમનુત્તમમ્ ॥ ૧૧॥

ગિરિજે પશ્ય પશ્યેદં લિઙ્ગં મઙ્ગલદાયકમ્ ।
કથમેતત્પ્રભાકૂટો દિશિ વિશ્રામ્ય ગચ્છતિ ॥ ૧૨॥

વેદાઃ સ્તુવન્તિ બહુધા લિઙ્ગસ્યાસ્ય મદાકૃતેઃ ।
માહાત્મ્યં મોક્ષદં પુણ્યં સ્વસ્વશક્ત્યા વરાનને ॥ ૧૩॥

કૃતધર્માઃ પૂતચિત્તા યે તપોમૂર્તયો જનાઃ ।
તેષામેવાસ્ય લિઙ્ગસ્ય દર્શનં ભવતિ પ્રિયે ॥ ૧૪॥

યદાકદાચિદ્યેનેદં લિઙ્ગં દૃષ્ટં મમ પ્રિયે ।
તેન ગર્ભાશયાવાસદુઃખં નો પ્રાપ્યતે ધ્રુવમ્ ॥ ૧૫॥

અસ્મિલ્લિઙ્ગે મુદા યેન દત્તં બિલ્વદલાદિકમ્ ।
તેન દત્તાનિ રત્નાનિ કોટિશો નાત્ર સંશયઃ ॥ ૧૬॥

અસ્મિલ્લિઙ્ગે મુન્દા દત્તં યેનાઽઽકલ્પં મમ પ્રિયમ્ ।
સસાગરનદીતોયે દત્તં તેનાખિલં પ્રિયે ॥ ૧૭॥

યેનાત્ર ફલમન્યદ્વા દત્તં લિઙ્ગે મદાત્મકે ।
તેન મેરુસમાન્નાનિ દત્તાન્યેવ ન સંશયઃ ॥ ૧૮॥

એકોઽપિ દત્તો યેનાત્ર દીપસ્તેન તુ કોટિશઃ ।
નિત્યમત્યુજ્જ્વલા દીપા દત્તાસ્તેન ન સંશયઃ ॥ ૧૯॥

એકા વાપિ કૃતા યેન લિઙ્ગસ્યાસ્ય પ્રદક્ષિણા ।
પ્રદક્ષિણીકૃતા તેન ક્ષોણી સર્વા ન સંશયઃ ॥ ૨૦॥

પ્રણામોઽસ્ય કૃતો યેન લિઙ્ગસ્યૈકોઽપિ ભક્તિતઃ ।
તેનાનન્તાઃ કૃતા ભક્ત્યા પ્રણામા નાત્ર સંશયઃ ॥ ૨૧॥

'લિઙ્ગમેતત્ક્ષણાર્ધં વા યેન ધ્યાતં મદાત્મકમ્ ।
તેન ધ્યાતોઽસ્મ્યહં સાક્ષાદ્બહુકાલં વરાનને ॥ ૨૨॥

તિલૈસ્ત્રૈયમ્બકેનાગ્નૌ યેનૈકાપ્યાહુતિર્હુતા ।
કોટિહોમાઃ કૃતાસ્તેન શ્રૌતાગ્નૌ વિધિપૂર્વકમ્ ॥ ૨૩॥

યેનૈકવારં જપ્તોઽત્ર શૈવઃ પઞ્ચાક્ષરો મનુઃ ।
તેન તપ્તં તપો ઘોરં કલ્પકોટ્યયુતં શિવે ॥ ૨૪॥

યેનૈકવારમાત્રં વા પઠિતં રુદ્રસૂક્તકમ્ ।
વેદપારાયણં તેન કલ્પકોટ્યયુતં કૃતમ્ ॥ ૨૫॥

તેન વેદત્રયીપાઠઃ કૃતઃ કલ્પાવધિ પ્રિયે ।
યેન કાશ્યાં સ્થિતં ભક્ત્યા ક્ષણાર્ધમપિ શોભને ॥ ૨૬॥

પઞ્ચાગ્નિમધ્યે તેનૈવ સ્થિતમબ્દસહસ્રકમ્ ।
યેનેદં પૂજિતં લિઙ્ગં જલપુષ્પફલાદિભિઃ ॥ ૨૭॥

તેનાહં પૂજિતઃ સાક્ષાન્નિત્યમબ્દસહસ્રકમ્ ।
દૃષ્ટં યેનેદમમલં લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ॥ ૨૮॥

તેન સાક્ષાદહં દૃષ્ટઃ પરમાનન્દલક્ષણઃ ।
યેનેદં પ્રણતં લિઙ્ગં મમ વિશ્વેશ્વરાભિધમ્ ॥ ૨૯॥

તેન સાક્ષાદહં ભક્ત્યા પ્રણતઃ સુરવન્દિતઃ ।
જ્ઞાનવાપ્યાં નિમજ્જ્યાત્ર યો માં લિઙ્ગસ્વરૂપિણમ્ ॥ ૩૦॥

યઃ સ્મેરત્ સ હિ મામેતિ સ્વવંશ્યૈરખિલૈઃ સહ ।
યેન સ્તુતમિદં લિઙ્ગં મમ વિશ્વેશ્વરાભિધમ્ ॥ ૩૧॥

તેન સાક્ષાદહં દેવિ સ્તુત એવ ન સંશયઃ ।
યેન સ્પૃષ્ટમિદં લિઙ્ગં મમ વિશ્વેશ્વરાભિધમ્ ॥ ૩૨॥

તેન સાક્ષાદહં દેવિ સ્પૃષ્ટ એવ ન સંશયઃ ।
પૂજિતોઽહં મહાદેવો દૃષ્ટઃ સ્પૃષ્ટઃ સ્તુતો નતઃ ॥ ૩૩॥

દાસ્યામ્યૈશ્વર્યમતુલં ભક્તિં ચ પરમાં શિવે ।
ઉપસર્ગ સહસ્રાણિ સોઢ્વા કાશ્યાં વસન્તિ યે ॥ ૩૪॥

તાનન્તકાલે સંસારાત્તારયિષ્યામિ શઙ્કરિ । ૩૫.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં કાશીમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૨-૩૫.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 2-35.1..

Notes:

Śiva શિવ describes to Pārvatī પાર્વતી about Kāśī કાશી, and the merits of worshiping Him there. He mentions about the Viśveśvaraliṅga વિશ્વેશ્વરલિઙ્ગ and Jñānavāpī જ્ઞાનવાપી.
Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

---

*Shivaproktam Kashimahimavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*